ईत् ।) दातव्यम् । दानीयम् । इति व्याकरणम् ॥ यथा, हितोपदेशे । १ । ३६ ।

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति ॥")

देव, ऋ ङ देवने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) देवनमिह क्रीड़ा । ऋ, अदिदेवत् । ङ, देवते बालः कन्दुकैर्नित्यमिति हलायुधः । देवनमिह रोदनमिति भट्टमल्लः । इति दुर्गादासः ॥

देवं, क्ली, (दीव्यत्यनेनेति । दिव + करणे घञ् ।) इन्द्रियम् । इति मेदिनी । वे, १२ ॥ (यथा, मुण्डकोपनिषदि । ३ । १ । ८ ।

"न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैस्तपसा कर्म्मणा वा ।
ज्ञानप्रसादेन विशुद्धसत्त्व-
स्ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥")

देवः, पुं, (दीव्यति आनन्देन क्रीड़तीति । दिव + अच् ।) देवता । (यथा, मनुः । ३ । ११७ ।

"देवानृषीन् मनुष्यांश्च पितॄन् गृह्याश्च देवताः ।
पूजयित्वा ततः पश्चात् गृहस्थः शेषभुग् भवेत् ॥")

नाट्योक्तौ राजा । इत्यमरः । १ । ७ । १३ ॥ राजा । (यथा, कादम्बरी । १८ ।

"सकलभूतलरत्नभूतोऽयं वैशम्पायनो नाम शुकः । सर्व्वरत्नानामुदधिरिव देवो भाजनमिति कृत्वैनमादायास्मत्स्वामिदुहिता देवपादमूलमायाता तदयमात्मीयः क्रियतामिति ॥")

मेघः । इति मेदिनी । वे, १२ ॥ (यथा, महाभारते । ३ । २३५ । २३ ।

"क्षेत्रे सुकृष्टे ह्युषिते च बीजे
देवे च वर्षत्यृतुकालयुक्तम् ॥"

केचित्तु देवशब्देन इन्द्र इति व्याचक्षते ॥) पारदः । इति राजनिर्घण्टः ॥ ब्राह्मणाना-मुपाधिभेदः । यथा, स्मृतिः ।

"देवपूर्व्वं नराख्यं स्यात् शर्म्मवर्म्मादिसंयुतम् ॥"

(ऋत्विक् । यथा, ऋग्वेदे । ६ । ६६ । ६ ।

"ब्रह्मा देवानां पदवीः कवीना-
मृषिर्विप्राणां महिषो मृगाणाम् ॥"

"देवानां स्तोत्रकारिणामृत्विजां ब्रह्मा ब्रह्माख्यर्त्विक्स्थानीयो भवति ।" इति तद्भाष्ये सायनः ॥) कायस्थादीनां पद्धतिविशेषः । तस्य विवरणं कायस्थशब्दे द्रष्टव्यम् ॥ (त्रि, दाता । द्योतयिता । दीपयिता । यथा, ऋग्वेदे ।१।१।१।

"अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ॥"

"देवशब्दो दानदीपनद्योतनानामन्यतममर्थमाचष्टे । यज्ञस्य दाता दीपयिता द्योतयिता यजमानैरित्युक्तं भवति ।" इति तद्भाष्ये सायनः ॥ विष्णुः । यथा, महाभारते । १३ । १४९ । ५४ ।

"उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ॥"

"दीव्यति यत् क्रीड़ति सर्गादिति विजिगीषति असुरान् व्यवहरति सर्व्वभूतेष्वात्मतया द्योतते स्तूयते स्तुत्यैः सर्व्वत्र गच्छति तस्माद्देवः । एको-देव इति मन्त्रवर्णात् ॥" इति तद्भाष्ये शङ्करः ॥

महादेवः । यथा, महाभारते ।१३।१७।६८।

"परश्वधायुधो देवः अनुकारी सुबान्धवः ॥")

देवकः, पुं, यदुवंशीयराजविशेषः । स श्रीकृष्णस्य मातामहः । इति श्रीभागवतम् ॥ (अयन्तु गन्धर्व्वपतेरंशावतारः । यथा, महाभारते । १ । ६७ । ९८ ।

"यस्त्वासीद्देवको नाम देवराजसमद्युतिः ।
स गन्धर्व्वपतिर्मुख्यः क्षितौ जज्ञे नराधिपः ॥")

देवकर्द्दमः, पुं, (देवप्रियः कर्द्दम इव ।) सुगन्धि-द्रव्यविशेषः । स श्रीखण्डागुरुकर्पूरकुङ्कुमसंमिश्रितैर्भवति । इति राजनिर्घण्टः ॥

देवकात्मजा, स्त्री, (देवकस्य आत्मजा कन्या ।) देवकी । इति शब्दरत्नावली ॥

देवकाष्ठं, क्ली, (देवप्रियं काष्ठम् ।) देवदारु । इति रत्नमाला ॥ देवदारुप्रभेदः । तत्पर्य्यायः । पूतिकाष्ठम् २ भद्रकाष्ठम् ३ सुकाष्ठकम् ४ स्निग्ध-दारुकम् ५ काष्ठदारु ६ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । रूक्षत्वम् । श्लेष्मानिलापहत्वञ्च । इति राजनिर्घण्टः ॥

देवकिरी, स्त्री, (देवं मेघं किरतीति । कॄ + "इगुप-धज्ञेति ।" ३ । १ । १३५ । इति कः । गौरादि-त्वात् ङीष् ।) मेघरागस्य भार्य्या । यथा,—

"ललिता मालसी गौरी नाटी देवकिरी तथा ।
मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः ॥"

अस्याः स्वरूपं यथा,—

"भ्रमन्ती नन्दने श्यामा पुष्पप्रचयतत्परा ।
ख्याता देवकिरी ह्येषा करार्पितसखीकरा ॥"
इति सङ्गीतदामोदरः ॥

देवकी, स्त्री, (देवक + ङीष् ।) देवकराजकन्या । सा वसुदेवपत्नी श्रीकृष्णमाता । तत्पर्य्यायः । दैवकी २ कृष्णजननी ३ देवकात्मजा ४ । इति शब्दरत्नावली ॥ इयं कश्यपपत्नी अदित्यंश-जाता । यथा,—

"देवकी रोहिणी चेमे वसुदेवस्य धीमतः ।
रोहिणी सुरभिर्देवी अदितिर्देवकी ह्यभूत् ॥"

अपि च ।

"कश्यपो वसुदेवश्च देवमाता च देवकी ।
पूर्व्वपुण्यफलेनैव संप्राप श्रीहरिं सुतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

देवकीनन्दनः, पुं, (देवक्या नन्दनः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥ (यथा, भागवते । १ । ८ । २१ ।

"कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥"

क्वचिदीकारस्य ह्रस्वोऽपि दृश्यते । यथा, महाभारते । २ । २४ । ३१ ।

"नैतच्चित्रं महाबाहो ! त्वयि देवकिनन्दने ॥")

देवकीसूनुः, पुं, (देवक्याः सूनुः पुत्त्रः ।) श्रीकृष्णः । इति हेमचन्द्रः । २ । १३२ ॥ (यथा, भविष्ये ।

"तुष्ट्यर्थं देवकीसूनोर्जयन्ती संज्ञकं व्रतम् ।
कर्त्तव्यं चिन्त्यमानेन भक्त्या भक्तजनैः सह ॥")

देवकुसुम्भा, स्त्री, महाद्रोणा । इति राजनिर्घण्टः ॥

देवकुलं, क्ली, (देवाय कोलतीति । कुल सङ्घाते + कः ।) विनासुखम् । इति हारावली । १९८ ॥ देउल इति भाषा ॥ (यथा, कथासरित्-सागरे । १२ । १२७ ।

"सोऽहं दारिद्रसन्तप्तस्तत्र नारायणाग्रतः ।
निराहारः स्थितोऽकार्षं गत्वा देवकुलं तपः ॥")

अस्य विवरणं चैत्यशब्दे द्रष्टव्यम् ॥

देवकुसुमं, क्ली, (देवप्रियं कुसुमं पुष्पं यस्य ।) लवङ्गम् । इत्यमरः । २ । ६ । १२५ ॥

देवखातं, क्ली, (देवेन खातम् । अकृत्रिमत्वादस्य तथात्वम् ।) देवखातकम् । इत्यमरटीकायां भरतः ॥ (यथा, मनुः । ४ । २०३ ।

"नदीषु देवखातेषु तड़ागेषु सरःसु च ।
स्नानं समाचरेन्नित्यं गर्भप्रस्रवणेषु च ॥")

देवखातकं, क्ली, पुं, (देवखातमेव । स्वार्थे कन् ।) अकृत्रिमजलाशयः । अपौरुषेयं देवकुण्ड-मित्यन्ये । इति सुभूतिः ॥ नागादिकुण्डमकृत्रिम-मिति स्वामी ॥ तत्पर्य्यायः । आखातम् २ । इति भरतः ॥ अखातम् । इत्यमरः । १ । १० । २७ ॥ दैवनिर्म्मितम् ४ । इति शब्दरत्नावली ॥ गुहा । इत्यमरटीकायां भरतः ॥

देवखातबिलं, क्ली, (देवखातं अकृत्रिमं बिलम् । नित्यकर्म्मधारयः ।) गुहा । इत्यमरः ।२।३।६॥

देवगन्धा, स्त्री, (देवप्रियो गन्धो यस्याः ।) महा-मेदा । इति राजनिर्घण्टः ॥

देवगान्धारी, स्त्री, श्रीरागस्य भार्य्या । यथा,—

"गान्धारी देवगान्धारी मालवश्रीश्च सारवी ।
रामकिर्य्यपि रागिण्यः श्रीरागस्य प्रिया इमाः ॥"
इति सङ्गीतदामोदरः ॥

अस्या गानसमयः शिशिर ऋतौ तृतीयप्रहरा-वधिरात्र्यर्द्धपर्य्यन्तम् ॥

देवगायनः, पुं, (देवानां गायनः ।) गन्धर्व्वः । इति हेमचन्द्रः । २ । ९७ ॥

देवगिरी, स्त्री, रागिणीविशेषः । इति हलायुधः ॥ सा सोमेश्वरमते वसन्तरागस्य भार्य्या वसन्त-ऋतौ सदा गेया । भरतमते हिन्दोलरागपुत्त्र-नागध्वनिभार्य्या । सङ्गीतदर्पणमते तु नटकल्याण-भार्य्या । अस्याः स्वरूपं यथा, अत्यभिरामघन-श्यामतनुः उत्तुङ्गपीनस्तनी हारकण्ठभूषणा क्षीणपङ्क्तिमध्यस्था मत्तचकोरनयना सुभङ्गाङ्गी च । अस्या गानसमयः हेमन्ते दिवाचतुर्थ-प्रहरावधिरात्र्यर्द्धपर्य्यन्तम् ॥

देवगुरुः, पुं, (देवानां गुरुः ।) वृहस्पतिः । इति पुराणम् ॥ (देवानां गुरुः पिता । कश्यपः । यथा, हरिवंशे । २४९ । ८ ।

"अपश्यन् कश्यपं तत्र मुनिं दीप्ततपोनिधिम् ।
आर्द्रं देवगुरुं दिव्यं क्लिन्नं चित्रवणाम्बुभिः ॥")

देवगृहं क्ली, (देवानां सूर्य्यादीनां गृहमिव ।) सूर्य्यचन्द्रादीनां ज्योतिर्म्मण्डलानि । यथा,—

"मन्वन्तरेषु सर्व्वेषु ऋक्षे सूर्य्यग्रहाश्रयात् ।
तानि देवगृहाणि स्युः स्थानाख्यानि भवन्ति हि ॥"
इति मत्स्यपुराणम् ॥